# শ্রীবেঙ্কটেশাষ্টকম্ ২

{॥ শ্রীবেঙ্কটেশাষ্টকম্ ২ ॥}

ওঁতৎসদিতি নির্দেশ্যং জগজ্জন্মাদিকারণম্ ।

অনন্তকল্যাণগুণং বন্দে শ্রীবেঙ্কটেশ্বরম্ ॥ ১॥

নতামরশিরোরত্ন শ্রীযুতম্ শ্রীপদাম্বুজম্ ।

প্রাবৃষেণ্যঘনশ্যামং বন্দে শ্রীবেঙ্কটেশ্বরম্ ॥ ২॥

মোহাদিষডরিব্যূহগ্রহাকুলমহার্ণবে ।

মজ্জতাং তরণীং নৃণাং বন্দে শ্রীবেঙ্কটেশ্বরম্ ॥ ৩॥

নাথং ত্রিজগতাং একং সাধুরক্ষণদীক্ষিতম্ ।

শ্রীশেষশৈলমধ্যস্থং বন্দে শ্রীবেঙ্কটেশ্বরম্ ॥ ৪॥

রাজদ্রাজীবপত্রশ্রীমদমোচনলোচনম্ ।

মন্দহাসলসদ্ বক্ত্রং বন্দে শ্রীবেঙ্কটেশ্বরম্ ॥ ৫॥

যন্মুখেন্দুস্মিতজ্যোৎস্না ভূযসীং তমসাং ততিম্ ।

বিধুনোতি প্রপন্নানাং বন্দে শ্রীবেঙ্কটেশ্বরম্॥ ৬॥

নান্তস্য কস্যচিদ্ বাক্যং শব্দস্যানন্য বাচিনঃ ।

ব্রহ্মারুদ্রেন্দ্রজনকং বন্দে শ্রীবেঙ্কটেশ্বরম্ ॥ ৭॥

যদ্বক্ষঃস্থলমধ্যাস্য ভাতি শ্রীরনপাযিনী ।

তডিল্লেখেবাভ্রমধ্যে বন্দে শ্রীবেঙ্কটেশ্বরম্ ॥ ৮॥

বেঙ্কটেশাষ্টকমিদং নরকণ্ঠীরবোদিতম্ ।

যঃ পঠেত্ সততং ভক্ত্যা তস্মৈ বিষ্ণুঃ প্রসীদতি ॥

॥ ইতি শ্রী বট্টেপল্লে নরকণ্ঠীরব শাস্ত্রি বিরচিতম্

শ্রী বেঙ্কটেশাষ্টকং সমাপ্তম্ ॥

From the book `Tirupati Sri Venkatesvara' by Sri Sadhu Subrahmanya Sastry

at pages 371 and 372

Encoded and Proofread by YV Malleswara Rao malleswararaoy at yahoo.com

Proofread by Avinash Sathaye

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Venkateshwara Ashtakam 2 Lyrics in Bengali PDF
% File name : venkaTeshAShTaka2.itx
% Category : aShTaka
% Location : doc_vishhnu
% Author : vaTTepalle narakaNThIrava shAstri
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
% Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com, Avinash Sathaye
% Latest update : August 8, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website